# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2024)
# विषय : संस्कृतम्

**कक्षा : दशमी** **कोड न. 049**

**SET : C**

रोल नं० | | | | | | | | | | |

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 10 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :-**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति –**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 08 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 22 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

Downloaded from cclchapter.com

# खण्डः 'क'

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

अस्माकं भारतवर्षे समये समये बहवः उत्सवाः मन्यन्ते। दीपोत्सवः भारतीयानां प्रसिद्धं पर्वम् अस्ति। दीपावली-उत्सवस्य इतिहासेन सह विशेषः सम्बन्धो वर्तते। यतोहि अयोध्यायाः नृपस्य दशरथस्य पुत्रः श्रीरामः चतुर्दश वर्षाणां वनवासकालं पूरयित्वा लंकाधीशं विजित्य सीतया लक्ष्मणेन च सह यदा अयोध्यायां पुनरागच्छत् तदा अयोध्यावासिभिः जनैः तेषां स्वागताय घृतदीपान् प्रज्वाल्य दीपावली कृता। अयम् उत्सवः कार्तिकमासस्य अमावस्यायां सम्पद्यते। अस्मिन् उत्सवे जनाः लक्ष्मीपूजां कुर्वन्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) भारतीयानां प्रसिद्धं पर्वं किमस्ति?
(ii) दीपोत्सवः कदा सम्पद्यते?
(iii) दीपावली-उत्सवस्य केन सह विशेषः सम्बन्धो वर्तते?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) भारतवर्षे समये समये बहवः के मन्यन्ते?
(ii) दीपोत्सवः केषां प्रसिद्धं पर्वम् अस्ति?
(iii) दशरथस्य पुत्रः कः आसीत्?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) रामः कस्य पुत्रः आसीत्?
(क) रावणस्य (ख) मेघनादस्य
(ग) दशरथस्य (घ) कुम्भकरणस्य

(ii) दीपोत्सवे जनाः कां पूजयन्ति?
(क) दुर्गाम् (ख) लक्ष्मीम्
(ग) सरस्वतीम् (घ) रामम्

(iii) 'प्रसिद्धं पर्वम्' अत्र विशेष्यपदं किम् ?
(क) पर्वम् (ख) प्रसिद्धं पर्वम्
(ग) प्रसिद्धम् (घ) दीपावली

(iv) 'पूरयित्वा' अत्र कः प्रत्ययः अस्ति?
(क) क्त्वा (ख) शतृ
(ग) तुमुन् (घ) शानच्

Downloaded from cclchapter.com

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. (क) अस्वस्थतायाः हेतोः दिनद्वयस्य अवकाशार्थं प्रधानाचार्यं प्रति प्रार्थनापत्रं लिखत। लिखिते प्रार्थनापत्रे उचितशब्दैः रिक्तस्थानानि पूरयत – 4

सेवायाम्

प्रधानाचार्यः महोदयः,

क.ख.ग.

दिल्लीनगरम्।

श्रीमन्

सविनयं (1) .................... अस्ति यत् अहं गत सायंकालतः (2) ..................... अस्मि। ज्वरतापेन अहं अत्यन्तं कृषः अस्मि। अतः भवान् दिनद्वयस्य (3).................स्वीकृत्य माम् अनुगृह्णातु।

भवदीयः (4)..............

मोहनः

कक्षा - 10

**मञ्जूषा**

| शिष्यः, निवेदनम्, ज्वरपीड़ितः, अवकाशम् |
|---|

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 4



(i) इदं .................... चित्रम् अस्ति ।

Downloaded from cclchapter.com

(ii) शिक्षिका छात्रान् ................ पृच्छति।

(iii) छात्राः ............ ददति।

(iv) छात्राः उत्तराणि ................. लिखन्ति।

**मञ्जूषा**

| उत्तराणि, पुस्तिकायाम्, प्रश्नम् ,कक्षायाः |
|---|

## खण्डः 'ग'

## पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते। प्रकृति समक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम्।

**अथवा**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्ध कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्, तथापि वृषभः नोत्थितः।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्ति उद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

**अथवा**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्।

Downloaded from cclchapter.com

(ख) बुद्धिर्बलवती तन्वी सर्वकार्येषु सर्वदा।

(ग) अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति।

(घ) यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥

**अन्वयः :-**

एक एव मानी (1) ........... चातकः (2) .............. वसति। पिपासितः वा (3) ............ पुरन्दरं (4) ................ वा।

**मञ्जूषा**

| |
|---|
| याचते, खगः, वने, म्रियते |

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 3×1=3

(केवलं प्रश्नत्रयम्)

एकः सिंहः सुखेन विश्राम्यते। तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।

**प्रश्नाः :-**

(क) सिंहस्य पुच्छं कः धुनोति?

(ख) वृक्षं कः आरूढः?

(ग) अपरः वानरः सिंहस्य किम् आकृष्य?

(घ) 'वृक्षस्योपरि' अस्य सन्धिविच्छेदः कः?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

Downloaded from cclchapter.com

अमंत्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।

अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।।

**प्रश्नाः :-**

(क) अमन्त्रं किं नास्ति?

(ख) अनौषधं किं नास्ति?

(ग) कीदृशः पुरुषः  नास्ति?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) उद्याने पक्षिणां कलरवं चेतः प्रसादयति। (केषाम् / काम्)

(ख) तत्र राजसिंहो नाम राजपुत्रः वसति स्मः। (कः / किम्)

(ग) व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत्। (कः /कम्)

(घ) सुराधिपः ताम् अपृच्छत्। (केषाम् / कः)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) स्वरसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) तत्पुरुषसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) करणकारकस्य अथवा अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'राम' शब्दस्य तृतीया-एकवचने।

(ii) 'लता' शब्दस्य चतुर्थी-द्विवचने।

Downloaded from cclchapter.com

(iii) ‘बालक’ शब्दस्य सप्तमी-एकवचने।

(iv) ‘किम्’ (पु.) शब्दस्य प्रथमा-बहुवचने।

(v) ‘साधु’ शब्दस्य द्वितीया-एकवचने।

(vi) ‘अस्मद्’ शब्दस्य तृतीया-एकवचने।

12. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'गम्'(गच्छ्) धातोः लृट्लकारस्य, प्र. पु., द्विवचने।

(ii) 'पठ्' धातोः विधिलिङ्गलकारस्य, उ.पु., एकवचने।

(iii) ‘भू’ (भव्) धातोः लट्लकारस्य, उ. पु., द्विवचने।

(iv) 'अस्' धातोः लोट्लकारस्य, प्र. पु., एकवचने।

(v) ‘हन्’ धातोः लट्लकारस्य, प्र. पु., बहुवचने।

(vi) ‘हस्’ धातोः लट्लकारस्य, म.पु., बहुवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) ............ स्वाहा। (इन्द्राय / इन्द्रस्य)

(ii) .......... ऋते सुखं नास्ति। (ज्ञानम् / ज्ञानात्)

(iii) ......... पिता अध्यापकः अस्ति। (रामात् / रामस्य)

(iv) सोहनः .......... निपुणः अस्ति। (संस्कृते / संस्कृतस्य)

(v) अर्जुनः ........ मृगं हन्ति। (बाणस्य / बाणेन)

14. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) यथा राजा .............. प्रजा। (तावत् / तथा)

(ii) ............ सोमवासरः अस्ति। (अपि / अद्य)

(iii) ईश्वरः ................. विद्यते। (सर्वत्र / अत्र)

15. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) आगत्य (ii) उपेत्य (iii) अनुगृहीतः

Downloaded from cclchapter.com

## खण्डः – ‘ङ’

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16\. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

(क) ‘इति + उक्त्वा’ अत्र किं सन्धियुक्तपदम्?

(i) इत्यक्त्वा (ii) इत्युक्त्वा

(iii) उक्त्वा (iv) क्त्वा

(ख) ‘ग्रामान्ते' इत्यस्मिन् पदे कः सन्धिविच्छेदः?

(i) ग्राम + अन्ते (ii) ग्राम+ ते

(iii) ग्रामा +अन्त (iv) ग्रामद् +अन्ते

(ग) ‘विज्ञानगर्वितः’ इत्यस्य पदस्य विग्रहपदं किम्?

(i) विज्ञानस्य गर्वितः (ii) विज्ञानाय गर्वितः

(iii) विज्ञानेन गर्वितः (iv) विज्ञाने गर्वितः

(घ) ‘कज्जलमलिनम्’ इत्यस्मिन् पदे कः समासः ?

(i) द्वन्द्वः (ii) कर्मधारयः

(iii) द्विगुः (iv) बहुव्रीहिः

(ङ) ‘सार्थकम्’ इत्यस्य पदस्य विलोमशब्दः किम् ?

(i) निर्धनस्य (ii) निर्बलम्

(iii) सुलभम् (iv) निरर्थकम्

Downloaded from cclchapter.com

(च) 'कृतज्ञता' इत्यस्य पदस्य विलोमपदम् ?

(i) कृपणता (ii) कातरता

(iii) कृतघ्नता (iv) कृपण

(छ) 'तनुः' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) मनः (ii) वनम्

(iii) धनम् (iv) शरीरम्

(ज) 'तनयः' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) शशिः (ii) सुतः

(iii) दिनकरः (iv) सुता

(झ) 'गम् + अनीयर्' इत्यस्मिन् संयोगे किं रूपम् ?

(i) गत्वा (ii) गन्तुम्

(iii) गमनीयः (iv) गतवान्

(ञ) 'गन्तुम्' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) क्त्वा (ii) शतृ

(iii) तुमुन् (iv) शानच्

(ट) 'त्रिंशत्' इत्यस्मिन् पदे का संख्या?

(i) 20 (ii) 30

(iii) 33 (iv) 13

(ठ) '49' इत्यस्य पदस्य किं संख्यावाचीपदम्?

(i) पञ्चाशत् (ii) एकोनपञ्चाशत्

(iii) चत्वारिंशत् (iv) त्रिंशत्

Downloaded from cclchapter.com

(ड) 'अपरः वानरः' अत्र किं विशेष्यपदम् ?

(i) वानरः (ii) अपरवानर

(iii) परः (iv) अपरः

(ढ) 'विचित्रे संसारे' अत्र किं विशेषणपदम् ?

(i) संसारे (ii) विचित्र

(iii) विचित्रे (iv) चित्रे

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

सः प्रातः .................... वादने व्यायामं करोति।



(i) सप्तवादने (ii) सार्धसप्त

(iii) अष्ट (iv) पञ्च

(त) लता ........................ कार्यालयं गच्छति।



(i) अष्टवादने (ii) अष्ट

(iii) नववादने (iv) दशवादने

Downloaded from cclchapter.com